CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 345

Title Nāga pañcami vrata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 345 Subject: Pauranic ~~Literal~~ Ritual

Title: Naga pançami vrata.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.5" by 5.4" Extent: 4 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

॥नागपंचमीनी कथा पत्र ४॥

॥श्रीगणेशाय नमः॥ श्रीकृष्णोवाच॥ पंचमी दयिता राजन् नागानां नंदवर्धनी॥ पंचम्यां किल नागा
नां भवतीत्युत्छवो महान्॥१॥ वासुकिस्तक्षकश्चैव कालिको मणिभद्रिकः॥ धृतराष्ट्रैरवतौ च कर्को
टकधनंजयौ॥२॥ एते प्रयच्छत्यभयं प्राणिनां प्राणजीविनां॥ पंचम्यां स्नापयंतीह नागान् क्षीरेण ये नरा
॥३॥ तेषां कुले प्रयच्छंति अभयं प्राणरक्षणं॥ शप्ता नागा यदा मात्रा दह्यमाना दिवानिशं॥४॥ निर्वापि
ता गवां क्षीरैः ततः प्रभृति वर्तते॥ युधिष्ठिर उवाच॥ मात्रा शप्ता कथं नागा किमुद्दिश्य चकार तां॥५॥
कथं चानंदमनवत् प्रसादं ब्रूहि माधव॥ श्रीकृष्ण उ॰॥ उच्चैःश्रवाश्वराजश्च श्वेतो जातोऽमृतोद्भवः॥ तं दृष्ट्वा
वाब्रवीत्कद्रू नागानां जननी च तां॥६॥ अश्वरत्नमिदं श्वेतं पश्य पश्यामृतोद्भवं॥ कृष्णांश्च पश्य वालां
श्च ॥ सर्वश्वेतमयश्च सः॥७॥ विनतोवाच॥ सर्वश्वेतो हयवरो नायं कृष्णो न लोहितः॥ कथं त्वं पश्यसे कृ
ष्णं विनतोवाच तां स्वसा॥८॥ कद्रूवाच॥ पश्येहमेकनयना कृष्णवालसमन्वितं॥ न द्विनेत्रा त्वं वनिते ते
न पश्य पणं कुरु॥९॥ विनतोवाच॥ अहं दासी भवित्री ते कृष्णत्वे च प्रदर्शिते॥ न चेद्दर्शयिसे कद्रू मे दासी ।१।
त्वं भविष्यसि॥१०॥ एवं ते च पणं कृत्वा गते क्रोधसमन्विते॥ शयने सा प्रदोषे तु कद्रूर्जिह्मं समन्वितयन्॥११॥
आहूय पुत्रान् प्रोवाच वाला भूत्वा हयोत्तमे॥ तिष्ठध्वं विपणे ज्येष्ठे विनतां जयगृह्णिनीं॥१२॥ प्राक्कस्तेजि

ल्लेबुद्धितानागाः कद्रूं विसृज्य च ॥ अधर्म एष सुमहान् करिष्यामो न ते वयं ॥ १३ ॥ अशापदुःखिता कद्रूपाव
को वः प्रधक्ष्यति ॥ गते बहुतिथे काले पांडवो जनमेजयः ॥ १४ ॥ सर्पसत्रं समकर्त्ता विन्नपमन्यैः सुदुष्करं ॥ त
स्मिन् सत्रे सर्पमांसं पावको नत्त्वयिष्यति ॥ १५ ॥ एवं शप्तां सुता कद्रूं प्रत्युवाच विवेकिनः ॥ मात्रा शप्तास्तदा
नागा कर्त्तव्यं नान्वचिंतयत् ॥ १६ ॥ वासुकिर्दुःखवृतस्सः पपात नु विमूर्छितः ॥ वासु तस्य दुःखस्य शांत्यर्थं ब्र
ह्माणं शरणं ययौ ॥ १७ ॥ वासुकिं दुःखितं दृष्ट्वा ब्रह्मलोकाच्च सांत्वयन् ॥ शृणु नार्थं वासुके त्वर्थं शृणु मद्वचनं प
रं ॥ १८ ॥ जायावरकुले जातो जरत्कारुरिति द्विजः ॥ भविष्यति महातेजास्तस्मिन् काले तपोनिधिः ॥ १९ ॥
भगिनीं च जरत्कन्यां तस्मै त्वं संप्रदास्यति ॥ भविता तस्य पुत्रो सोऽस्तिक इति विश्रुतः ॥ २० ॥ सतु सत्रं प्र
वृद्धं वै नागानां भयदं महत् ॥ निषेधयिष्यति मुनिर्वाग्भिः संस्तूय पार्थिवं ॥ २१ ॥ तदियं भगिनी नागरूपो
दार्यगुणान्विता ॥ जरत्कन्या जरत्कारो प्रदेया ह्यविचारतः ॥ २२ ॥ यथा सौ प्रार्थयेरण्येयत्किंचिच्च वदि
ष्यति ॥ तत्कर्त्तव्यमशंकेन इच्छता श्रेयमात्मनः ॥ २३ ॥ पितामहवचश्श्रुत्वा वासुकिः प्रणिपत्य च ॥ तथा
करोनियत्नो स्वं यत्नं परमधर्मतः ॥ २४ ॥ तच्छ्रुत्वा पन्नगाः सर्वे प्रहर्षोत्फुल्ललोचनाः ॥ पुनर्जातमिवात्मा
नं मेनिरे नु द्विज गोत्तमा ॥ २५ ॥ आप्लवेऽनु निमग्नानां घोरे यज्ञाग्निसागरे ॥ आस्तिकस्तत्र भविता प्लव

तोभयप्रदः ॥२६॥ कृत्वा ततोग्निं राजानं क्षत्विजस्तदनंतरं ॥ निवर्तयिष्यते यागं नागानां होममंतरं ॥
॥२७॥ पंचम्यां तत्र भविता ब्रह्मा प्रोवाच वै जिह्मान् ॥ तस्मादियं महाराज पंचमी दयिता सदा ॥२८॥ नागा
नां हर्षजननी दत्ता वै ब्रह्मणा पुरा ॥ दत्वा तु भोजनं पूर्वं ब्राह्मणानां तु कामतः ॥२९॥ विसृज्य नागाः प्रीयं
तां ये केचित्पृथिवीतले ॥ हिमाचलेषु ये नागाः अंतरिक्षे तथा दिवि ॥३०॥ नदीषु ये महानागा ये सार
स्वतगामिनः ॥ ये वापीषु तडागेषु तेषु सर्वेषु वै नमः ॥३१॥ विप्रांश्च नागान् संपूज्य विसृज्य च यथार्थ
तः ॥ ततः पश्चात्तु भुंजीयात्सह भृत्यैर्नरोपि स्वयं ॥३२॥ पूर्वं मधुरमश्नीयात्स्वेच्छया तदनंतरं ॥ एवं निय
मयुक्तस्य यत्फलं तन्निबोध मे ॥३३॥ मृतो नागपुरे याति पूज्यमानोप्सरोगणैः ॥ विमानवरमारू
ढो रमते रमते कालमिप्सितं ॥३४॥ इह चागत्य चागत्य राजा सो सर्वजनप्रियो भवेत् ॥ सर्वरत्नसमृ
द्धश्च वाहनाढ्यश्च जायते ॥३५॥ पंच जन्मान्यसौ राजानि यतं द्वापरे भवेत् ॥ आधिव्याधिविनिर्मुक्तः
पत्नीपुत्रसहायवान् ॥३६॥ तस्मात्तु पूज्यश्च मान्यश्च घृतक्षीरादिना सदा ॥ युधिष्ठिर उ० ॥ दशेति १२
येन रुक्ष्म नागाः क्रोधसमन्विताः ॥ भवेत् किं तस्य दष्टस्य विस्तरात्कथयस्व मे ॥३७॥ श्रीकृष्ण० ॥
नागदष्टेन रो राजन् प्राप्त मृत्युर्व्रजत्यधः ॥ अधो गत्वा भवेत्सर्पो निर्विषो नात्र संशयः ॥३८॥ युधि

छिरञ्चौ।सर्पदष्टः।पितायस्यभ्रातामातापितासुताः।स्वसावादुहिताभार्याकिंकर्त्तव्यंवद
स्वमे।३९।सोऽप्यायतस्यगोविंददानंव्रतमुपोषितं।ब्रूहिशार्दूलतेसर्वेयेनस्वर्गमवाप्नुया
त्।४०।उपोष्यपंचमीराजन्नागानांपुष्टिवर्द्धना।त्वमेकमेवराजेंद्रविधानंशृणुयाद्
शं।४१।श्रावणस्यसितेपक्षेपंचमीपुण्यवर्द्धनी।सापिपुण्यतराप्रोक्ताग्राह्याचदिनकाम्य
या।४२।द्वादशवर्षांतेपंचमेन्नरतर्पणं।चतुर्थ्यामेकभक्तंतुतस्यान्नक्तंप्रकीर्त्तितं।
।४३।भूरिरत्नमयंनागमथवाकंधौतकं।कृत्वादारुमयंवापिउतहेमन्मयंतथा।४४।पंच
म्यामर्चयेद्भक्त्यानागंपंचफणंशुभं।करवीरैस्तथापद्मैःहृज्यंपन्नगसत्तमं।४५।गंधधूपैः
स्तुनैवेद्यैःहृज्येद्भक्तिभावतः।ब्राह्मणान्भोजयेत्पश्चात्घृतपायसमोदकैः।४६।ना
रायणबलिःकार्यःसर्पदष्टस्यतेहितः।दानेपिंडप्रदानेचब्राह्मणानांचतर्पिते।४७।दृष्टो
सर्गश्चकर्त्तव्योगतेसंवत्सरेनृप।स्नानंकृत्वोदकंकुर्यात्कृत्स्नोयंप्रीयतामिति।४८।
अनंतंवासुकिंशंखंपद्मंकंबलमेवच।तथाकर्कोटकंनागंनागमश्वतरंनृप।४९।धृत
राष्ट्रंशंखपालंकालेयंतक्षकंतथा।पिंगलंचमहानागंमासिमासिप्रकीर्त्तिता।५०।

वत्सरांते पारणं स्यात् कुर्यात् ब्राह्मणभोजनं। इतिहासविधिर्नागं कांचनेन कृतं नृप।
५१। तथा पूर्वं विप्राय दातव्या सवत्सा गौश्च दोहिनी। एष वै पारणं मासि कार्यं विधि प्रोक्तो विचक्ष
णैः।५२। ततस्ते भुवने राजन् संतिष्ठंति यांति बांधवाः। ये दंदशूकदष्टा नैः दष्टा प्राप्ता मधो
गतिः।५३। वर्षमेकं करिष्यंते भक्त्या च व्रतमुत्तमं। दाष्टीकं मोक्षयैते तेषां मनस्कामवा
प्नसि।५४। यश्चेदं शृणुयान्नित्यं पठेद्वा श्रद्धयान्वितः। न न तूकुंटे वै नागेभ्यो भयं भवति
कुत्रचित्।५५। तद्भाद्रपदे मासि पंचम्यां श्रद्धयान्वितः। यश्चेल्लिखं वं नरो नागान् कृष्ण
वर्णादिवर्णकैः।५६। पूजयेत् गंधपुष्पैश्च नैवेद्यं गुडपायसैः। तस्य पुष्टि समायांतु पन्नगास्त
क्षकादयः।५७। आसप्तमी समानू कुलान्तस्य न भयं नागतो भवेत्। तस्मात्सर्वप्रयत्नेन नागा
न् संपूजयेद्बुधः।५८। तथाश्वयुजे मासि पंचम्यां कुरुनंदन। कृत्वा कुशमयान्नागान् इं
द्राण्या सह पूजयेत्।५९। घृतोदकाभ्यां पयसा स्नापयित्वा विशांपते। गोधूमैः पयसासा ।३।
ध्नैः भक्ष्यैश्च विविधैस्तथा।६०। यस्त्वर्चां विविधान्नागान् श्रुचिर्भक्त्या समन्वितः। पूजयेत्तत्कु
रु शार्दूल तस्य पुत्रादयो नृप।६१। नागाः प्रीता भवंति हि शांतिं प्राप्नोति शोभने। स शांति

लोकमासाद्यमोदतेशाश्वतीसमाः॥६२॥इत्येवंकथितंवीरपंचमीव्रतमुत्तमं॥तत्राय
च्यतेमंत्रःसर्वदोषनिशेधकः॥६३॥ॐकुरुकुल्लेस्वाहा॥नक्तेनभुक्तिसहितासातुपंचमीकुरु
र्वंतिनागान्कुसुमोपहारैः॥तेषांगृहेषुनभयदाहिसदैवसर्पाःसप्तफणामणिविम
रिचिरश्चोभवंति॥६४॥श्रावणस्यसितेपक्षेनागानांपूजनंसदा॥वर्षेवर्षेप्रकर्त्तव्यंस्त्रीणां
चैवसदैवहि॥६५॥चंदनेनलिखेत्(भित्तौ)कुंडेदध्नावापायसेनवा॥पूजयेत्परयाभक्त्याचंद
नैर्गजलैस्तथा॥६६॥पुष्पैर्नानाविधैश्चैवधूपदीपसमन्वितैः॥अर्घंकर्कटिनिर्देयंकुनुका
लकालफलैःशुभैः॥६७॥नैवेद्यंविधिवद्दद्यात्घृतपायसतंदुलैः॥ब्राह्मणान्भोजयेत्प
श्चात्घृतपायसमोदकैः॥६८॥पश्चाद्भोजनंकार्यंइष्टबंधुजनैःसह॥अखंडितंस्वेनभो
ज्यंनागानांप्रीतिवर्द्धनं॥६९॥अनेनविधिनाराजन्कर्त्तव्यानागपंचमी॥संततिस्तस्य
वर्द्धतेनभवेन्नागजंभयं॥७०॥नकारोतियदानारीश्रावणेनागपंचमी॥वैधव्यंपुत्रशो
कंचदुर्भगात्जन्मजन्मनि॥७१॥पुत्रकामाविशेषेणवर्षमेकंतुकारयेत्॥मासेमासेप्र
कर्त्तव्यापंचमवत्छरावधि॥७२॥वर्षांतेचप्रकर्त्तव्यमुद्यापनविधिंशुभं॥मंडलंकारये

तु राजन्सर्वतोन्नदमेव च ।७३। स्थापयेद्वर्णं कुंभं ताम्रजं वाथ मृन्मयं । नागं हेममयं
कृत्वा पूजयेद्भक्तिभावनः ।७४। चंदनैः कुसुमैः शुभ्रैः नैवेद्यैर्विविधैस्तथा । दानं दत्वा
यथाशक्त्या ब्राह्मणाय कुटुंबिने ।७५। वंशपात्रं ततो दद्यात् अष्टसौभाग्यसंयुतं । नव
भिः पंचभिर्वापि भोजयेच्च सुवासिनीः ।७६। अर्चयेत्कुंकुमैः पुष्पैः फलं दत्वा विसर्जये
त् । वंशवृद्धिर्भवेत्तस्य पुत्रपौत्रादिकं सुखं ।७७। सर्वान्कामानवाप्नोति इहात्रा च प
रत्र च ।७८। इति श्रीभविष्योत्तरपुराणे नागपंचमीव्रतं संपूर्णं ।। ।।छ।। ।।
।। ।।श्री।। ।।छ।। ।।श्री।। ।।श्री विघ्नेशो वांछितार्थं ददातु ।। ।।श्री रस्तु